अनुक्रमांकः ....................................
निरीक्षकस्य हस्ताक्षरम् ..........................

**Paper Code**
**MV-102**

# पतञ्जलिविश्वविद्यालयः

## परीक्षा - दिसम्बरमासः - 2018

## एम.ए. संस्कृत-व्याकरणम्, (सत्रम् : प्रथमसत्रम)

## द्वितीयपत्रम् - संस्कृतव्याकरणम् (ख)

**समयः - होरात्रयम्** **अधिकतमाङ्काः - 70**

**निर्देशः** अस्य प्रश्नपत्रस्य सप्तत्यङ्काः निर्धारिताः सन्ति। इदं प्रश्नपत्रम् 'क' 'ख' 'ग' 'घ' इत्याख्येषु चतुष खण्डेषु विभक्तं वर्तते। प्रत्येकखण्डे प्रदत्तानां विस्तृतनिर्देशाणामनुसारेणैव प्रश्नाः समाधेयाः।

### खण्डः क
### (दीर्घोत्तरीयप्रश्नाः)

**निर्देशः** पृष्टेषु चतुर्षु द्वौ द्वीर्घप्रश्नौ समाधेयौ । **(2×15=30)**

1. वृद्धिगुणौ अलोऽन्त्यस्य यदि भवतः, तत्र के दोषाः?
2. 'मुखग्रहणं शक्यमकर्तुम्' इतिपङ्क्तेः सविस्तरं व्याख्यानं कुर्वन्तु।
3. 'ष्णान्ता षट्' इतिसूत्रं भाष्यरीत्या विविच्यताम्।
4. घुसञ्ज्ञायां प्रकृतिग्रहणं कर्त्तव्यं नवेति ?

### खण्डः ख
### (लघूत्तरोयप्रश्नाः)

**निर्देशः** पृष्टेषु सप्तसु चत्वारो लघुप्रश्नाः समाधेयाः। **(4×5=20)**

1. 'शचङन्तस्यान्तरङ्गलक्षणत्वात्' इति वार्तिकं व्याख्यायताम्।
2. सञ्ज्ञासञ्ज्ञ्यसंदेहे कानि प्रमाणानि?
3. 'आकारस्य तपरकरणं सवर्णार्थम्' इत्यस्य कोऽभिप्रायः?
4. 'न धातुलोप आर्धधातुके' इत्यत्र परिगणनं किम्?
5. 'उपधारोरवीत्यर्थम्' इति कस्मिन् प्रसङ्गे उच्यते?
6. 'सिद्धः प्लुतः स्वरसन्धिषु' इति कथञ्ज्ञायते?
7. 'काशे' इत्यत्र 'शे' कथं न प्रवर्तते?

### खण्डः ग
### (अतिलघूत्तरीयाः प्रश्नाः)

**निर्देशः** पृष्टेषु त्रयोदशसु दश अतिलघुप्रश्नाः समाधेयाः। **(01×10=10)**

1. तपरशब्दे कः समासः ?
2. 'आदैच्' इत्यस्य भत्वं केन ?
3. दीध्यदित्यत्र को विकरणः ?
4. 'चटुतुलशर्व्यवाये न' इत्यस्य कोऽर्थः ?
5. 'कर्तरि' इत्यत्र केन गुणः ?
6. 'रकि ज्यः सम्प्रसारणम्' इति वार्तिकस्य कोऽर्थः ?

7. 'अकणिषम्' इत्यत्र कः प्रत्ययः ?
8. 'खट्वे' इत्यत्र प्रगृह्यसञ्ज्ञा केन ?
9. 'राजकीयम्' इत्यत्र केन सूत्रेण कः प्रत्ययः ?
10. निपात एकाजनाङ् इत्यत्रानाङ्ग्रहणं किमर्थम् ?
11. 'प्रत्तम्' इत्यत्र तत्त्वं केन ?
12. 'सङ्ख्या' इति अन्वर्थसञ्ज्ञा कथम् ?
13. 'उदवोढम्' इति कुत्रत्यं रूपम् ?

## खण्डः घ

## (वस्तुनिष्ठप्रश्नाः)

**निर्देशः** पृष्टा वस्तुनिष्ठप्रश्नाः समाधेयाः। **(01×10=10)**

1. 'इको गुणवृद्धी' इत्यत्र इग्ग्रहणं किमर्थम् ?
   (अ) आकारनिवृत्यर्थम् (ब) सन्ध्यक्षरनिवृत्यर्थम्
   (स) व्यञ्जननिवृत्यर्थम् (द) सर्वार्थम्
2. 'वृद्धिरादैच्' इत्यत्र तपरकरणं किमर्थम् ?
   (अ) पूर्वार्थम् (ब) उभयार्थम्
   (स) उत्तरार्थम् (द) इष्टार्थम्
3. अधोलिखितेषु किं शुद्धं रूपमस्ति ..........
   (अ) न्यनुवीत् (ब) न्यनवीत्
   (स) न्यनावीत् (द) न कोऽपि
4. आर्धधातुक ग्रहणं कस्य विशेषणम् ?
   (अ) लोपविशेषणम् (ब) गुणवृद्धिविशेषणम्
   (स) उभयविशेषणम् (द) वृद्धिविशेषणम्
5. 'दीधीवेवीटाम्' सूत्रामिदं कि प्रकारकम् ..........
   (अ) परिभाषासूत्रम् (ब) निषेधसूत्रम्
   (स) नियमसूत्रम् (द) अधिकारसूत्रम्
6. 'हलोऽनन्तराः संयोगः' कः समासः ?
   (अ) द्वन्द्वः (ब) बहुव्रीहिः
   (स) नञ्तत्पुरुषः (द) अव्ययीभावः
7. 'नाज्झलौ' इत्यस्य सूत्रस्य किमुदाहरणम् ..........
   (अ) दधीन्द्रः (ब) दधिशीतम्
   (स) रमेशः (द) न किमपि
8. प्रगृह्यसंज्ञायाः किं कलम् ?
   (अ) सन्धिकार्यम् (ब) प्रकृतिभावः
   (स) उभयम् (द) न किमपि
9. 'अमी+अत्र' इत्यत्र प्रगृह्यसंज्ञा केन सूत्रेण भवति ?
   (अ) शे (ब) नियात राकजनाङ्
   (स) अदसो मात् (द) ओत्
10. 'दाधा ध्वदाप' इत्यत्र 'अदाप' पदेन किं गृह्यते ..........
   (अ) दाप् लवने (ब) दैप् शोधने
   (स) उभयम् (द) डुदाञ दाने

--------------x--------------